# आचार्यप्रथमवर्षम्

# चतुर्थपत्रम्- नव्यव्याकरणम्

# शैक्षिकनिष्पत्तिः

आचार्यकक्षायाः प्रथमवर्षे प्रथमद्वितीयसत्रार्द्धयोः चतुर्थपत्ररूपेण कौण्डभट्टविरचितः वैयाकरणभूषणसारनामकः ग्रन्थो निर्धारितो वर्तते। तत्र प्रथमसत्रार्द्धे आरम्भतः सुवर्थप्रकरणं यावत् द्वितीयसत्रार्द्धे च नामार्थप्रकरणात् स्फोटनिर्णयपर्यन्त वर्तते। ग्रन्थस्यास्य वैशिष्ट्यम् निष्कर्षज्ञानम्।

1. वैयाकरणानां सिद्धान्तानां निष्कर्षज्ञानम्।
2. नैयायिकमीमांसकानां मतविवेचनम्।
3. नैयायिकवैयाकरणविषययोः दार्शनिकत्वविवेचनम्।
4. वैयाकरणनैयायिकमीमासकरीत्या धातोः अर्थविवेचनपुरस्सरं वैयाकरणमतस्य ज्यायस्त्वविवेचनम्।
5. लकाराणां क्रमिकत्वविज्ञानम्, लकारार्थविवेचनपूर्वकं लिङ्र्थस्य प्रवर्तनात्वविचारः।
6. सुबादिप्रत्यानाम् अर्थविवेचनम्।
7. स्वशास्त्ररीत्या शास्त्रान्तररीत्या च कारकलक्षणं कारकभेदविवेचनविमर्शः।

**द्वितीयसत्रार्धे तृतीयपत्रस्य अधोलिखितं वैशिष्ट्यम्।**

1. नाम पदेन प्रतिपदिकस्य ज्ञानम्। शास्त्रेषु प्रातिपदिकार्थाः कति के च? यथा जाति–व्यक्ति–लिङ्ग संज्ञाकारणाणां नामार्थस्वकीरे वैशिष्ट्यं, शब्दस्यापि नामार्थस्वीकारे वैलक्षण्यम्।
2. निपातपदेन कस्य ज्ञानम्? उपसर्ग निपातयोः भेदविज्ञानम्।

3. उपसर्ग निपातयोः द्योतकत्वंवाचकत्वं वेति साधनम्।
4. नञर्थविचारः। न अर्थस्य षड्विधत्वं तत्सादृश्यादिरूपम्,।
5. नञर्थस्यस्य पर्युदासप्रसज्यप्रतिषेधरूपस्य विवेचनम्।
6. शक्तिपदार्थविवेचनम्, समासशक्तिविवेचनम्, समानार्थभेदभानम्।
7. स्फोटलक्षणम्, तद्भेदविवेचनम्, स्फोटस्य अखण्डत्वविवेचनम् वाक्यस्फोटस्य सिद्धान्तत्वविवेचनम्।